# आदर्शप्रश्नपत्रम्

अस्मिन् प्रश्नपत्रे 42 प्रश्नाः सन्ति .....08...... मुद्रितपृष्ठाः च 1

कूट सं ......................

अनुक्रमाङ्कः (अङ्केषु) :

(शब्देषु)

# संस्कृतम्

## 209

परीक्षादिवसः दिनाङ्कश्च ..............................................................................

निरीक्षरहस्ताक्षरद्वयम् 1. ..........................................................................

2. ..........................................................................

**सामान्य-अनुदेशाः-**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) व (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखत।
4. वस्तुनिष्ठप्रश्नसहितस्य सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या 41/S/O/S अवश्यं लेखनीया।

# संस्कृतम्

## 209

समय: होरात्रयम् पूर्णाङ्का: - 100

**निर्देशा:** *1. अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्ना: सन्ति।*

*2. प्रत्येकं प्रश्नस्य समक्षम् अङ्का: सूचिता:*

*3. सर्वे प्रश्ना: अनिवार्या:।*

प्रश्नसंख्या 1–10 = 10

1. प्रेरणापाठानुसारं शिलाखण्डे के आसन्?

(A) महिला: (B) बालका: (C) गर्ता: (D) तृणानि

2. त्याज्यं न धैर्यमिति पाठे क: धैर्यशील: आसीत्?

(A) वानर: (B) मकर: (C) मकरी (D) उपर्युक्तेषु न कोऽपि

3. अभिवादनशीलस्य जनस्य इदं न वर्धते–

(A) आयु: (B) विद्या (C) यश: (D) तृष्णा

4. शकुन्तला - (गतिभङ्गं रूपयित्वा) को नु खल्वेष मे वस्त्रे सज्जते? इत्यत्र क: शकुन्तलाया: वस्त्रे सज्जते?

(A) लता (B) हरिण: (C) हरिणशावक: (D) बालक:

5. ससन्तोषस्तथा नित्यम् इति गुण: कस्मिन् विद्यते?

(A) शुनि (B) बके (C) गर्दभे (D) कुक्कुटे

## व्याकरणम्

6. भार्यायै इत्यत्र पदे का विभक्ति:?

(A) चतुर्थी (B) तृतीया (C) प्रथमा (D) षष्ठी

7. '<u>भूमे:</u>' गुरुतरा माता:' इति पङ्क्त्यां 'भूमे:' इति पदे का विभक्ति:?

(A) षष्ठी (B) पञ्चमी (C) सप्तमी (D) प्रथमा

8. '<u>अन्वशिक्षं</u> क्षिते: व्रतम्' इति पंक्तौ रेखाङ्कितपदे क: लकार: विद्यते?

(A) लट् (B) लोट् (C) लङ् (D) विधिलिङ्

9. 'विद्वान् मार्गात् न चलेत् इति वाक्यं बहुवचने किं भविष्यति–

(A) विद्वानाः मार्गात् न चलेयुः।

(B) विद्वांसः मार्गात् न चलताम्।

(C) विद्वांसौ मार्गात् न चलेताम्।

(D) विद्वांसः मार्गात् न चलेयुः।

10. रिक्तस्थाने किं पदं भविष्यति?

वित्तम् एति च .................. च।

(A) आयाति (B) याति (C) यान्ति (D) आयान्ति

11. कण्वः वत्से! भर्तुः बहुमता भव। सम्राजं सुतम् आप्नुहि, इत्यत्र कण्वः कस्यै किम् आशीर्वादं यच्छति? 1+1=2

12. आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम्। इति पंक्तौ कथं कृतं पापं मृत्युपर्यन्तं शल्यवत् कष्टप्रदं भवति? 2

13. तेन त्यक्तेन भुञ्जीथाः' इत्यत्र धनस्य भोगः कथं करणीयः? 2

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत 1x3=3

चन्द्रकेतुः– आर्य! एकाकिनं लवम् उद्दिश्य बहूनां युद्धारम्भः इति लज्जते मे हृदयम्।

सुमन्त्रः– वत्स! समस्तसैन्यदलम् अपि लवसमक्षं योद्धुम् नालम्।

चन्द्रकेतुः (सविस्मयम्)–हन्त! प्रतिनिवर्तन्ते अस्माकं सैनिकाः। आर्य! त्वर्यताम्, त्वर्यताम्। अस्मद्रथं तत्रैव नयतु।

**प्रश्नाः**

(i) लवेन सह युद्धं कृत्वा के प्रतिनिवर्तन्ते?

(ii) चन्द्रकेतुः कं रथं युद्धस्थले नेतुम् आदिशति?

(iii) चन्द्रकेतुः किमर्थं लज्जितः इव अनुभवति?

15. अधोलिखितस्य एकस्य चरित्रचित्रणं पञ्चवाक्येषु कुरुत 1x5=5

लवः अथवा कण्वः

16. क्रोधः सुदर्जयः शत्रुः, लोभो व्याधिरनन्तकः। 1+1=2

इत्यत्र क्रोधः कीदृशः शत्रुः वर्णितः, लोभश्च कीदृशः व्याधिः?

17. बकः कानि संयम्य कार्यं करोति? 1+1=2

अस्माभिः ततः का शिक्षा ग्रहीतव्या?

18. मृजया रक्ष्यते रूपं, कुलं वृत्तेन रक्ष्यते 1+1=2

इत्यत्र रूपस्य रक्षा कया भवति, कुलस्य रक्षा च कथं भवति?

19. 'त्वया विहीनो यत्राहं विललाप सुदुःखितः 1+1=2

इति प्रसङ्गे कः कस्याः विरहे विलापम् अकरोत्?

20. अधोलिखितपद्यं पठित्वा प्रश्नान् उत्तरत 1x3=3

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते।

तस्मात्कायविशुद्ध्यर्थं स्नानमादौ विधीयते।।

स्नानेन के त्रयः लाभाः भवन्ति इति लिखत

21. (i) अधोलिखितपद्यस्य अन्वये रिक्तस्थानानि पूरयत-

पद्यम्-दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।

अन्वयः

यद् दानम् ...(i).... इति (विचिन्त्य) अनुपकारिणे देशे काले च .....(ii)..... च दीयते तत् दानं ....(iii)..... स्मृतम्ः।

1x3=3

अथवा

अधोलिखितभावार्थे रिक्तस्थानपूर्तिं कुरुत

यदा मया तु '......(i).......' एव इति विना स्वार्थं उचिताय .......(ii)........ उचितस्थाने उचितसमये च दीयते तत् दानम् .........(iii).......... उच्यते।

22. स्वस्तिपन्थामनुचरेम सूर्याचन्द्रमसाविव। इत्यत्र 1+1=2

रेखाङ्कितपदमाधृत्य प्रश्ननिर्माण कुर्वन्तु?

23. 'अहो सत्यमभिहितं भवता। ममाप्यभीष्टमेतत्। तदन्यत्र गम्यताम्' इति प्रत्युत्पन्नमतिः 1+1=2

कं मत्स्यम् कथयति? तौ मत्स्यौ केषां भयात् सरः त्यक्तुमुद्यतौ?

24. तदहं न यास्यामि। भवद्भ्यां च यत्प्रतिभाति तत्कर्तव्यम् इति 'यद्भविष्यो विनश्यति' पाठे 1+1=2

यदभविष्यःकिमर्थं सरः त्यक्तुं न इच्छति? तस्य कः अन्तः भवति?

25. अधोलिखितगद्यांशं पठित्वा प्रश्नान् उत्तरत

लीलावती भास्कराचार्यस्य पुत्री आसीत्। पुत्रीं शिक्षमाणः सः तस्याः कृते मनोविनोदयुक्तं गणितं काव्यरूपेण अरचयत्। सः पशुपक्षिभ्रमरहंसादिमाध्यमेन गणितस्य जटिलप्रश्नान् अरचयत् तेषां समाधानं चापि अकरोत्। अतोऽयं ग्रन्थः 'लीलावती' इति नाम्ना प्रसिद्धः।

**प्रश्नाः**

(i) 'लीलावती' इति पुस्तकं गद्ये अस्ति पद्ये वा?

(ii) 'लीलावती ग्रन्थे' इति कस्य विषयस्य प्रश्नाः सन्ति?

(iii) गणितस्य प्रश्नाः कान् आधारीकृत्य निर्मिताः? 1x3=3

26. भो मूर्ख! न कोऽपि जीवः हृदयं विना जीवति। न वा तत् पृथक् कर्तुं शक्यते। अतः त्वं गच्छ पत्नीं च प्रीणय- समाप्ता आवयोः मैत्री इति अंशः कस्मात् पाठात् संगृहीतः? अत्र कयोः मैत्री समाप्ता किञ्च तत्र कारणम् आसीत्? 1x3=3

27. कस्यचित् एकस्य पाठस्य सारं पञ्चवाक्येषु लिखत- 1x5=5

(i) कर्त्तव्यनिष्ठा

(ii) प्रेरणा

(iii) प्राणस्य श्रेष्ठत्वम्

## अनुप्रयुक्तव्याकरणम्

28. अधोलिखितपदद्वयस्य सन्धिच्छेदं कुरुत- 1+1=2

(i) सूर्याचन्द्रमसाविव

(ii) मित्रस्याहम्

29. व्यंजनसन्धेः उदाहरणत्रयं लिखत 1+2=3

30. अधोलिखितानां वर्णानां उच्चारणस्थानानि लिखत- ½x4=2

य, त, ष, ख

31. भ्रातरम्, स्वसारम्, वः, नः इति पदेषु ½x4=2

काः विभक्तयः किं च वचनम्?

32. रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत 3

(i) तडागे 3 मत्स्याः अवसन्।

(ii) वृक्षे 4 तित्तलिकाः भ्रमन्ति स्म।

(iii) सः 2 मित्राभ्यां सह आपणं गच्छति।

33. (i) त्यज तव कुसुमं, त्यज धूपम् (1+1=2)

(ii) ध्यानं हित्वा बहिरेहि त्वम्।

रेखाङ्कितपदयोः कौ मूलधातू कः च लकारः?

34. (i) ईशस्तिष्ठति वर्षातपयोः (1+1=2)

(ii) तत्रास्ति ईशः

रेखाङ्कितपदयोः कौ धातू कः च लकारः।

35. अधोलिखितयोः समस्तपदयोः विग्रहं लिखत (1+1=2)

(i) सत्याग्रहाश्रमे

(ii) द्रुमतले

36. अधोलिखितविग्रहाणां स्थाने समस्तपदं लिखत (1+1=2)

(i) महान आत्मा यस्य सः = ....................

(ii) सुस्मितम् आननं यस्य सः = ....................

37. रेखाङ्कितस्थाने किं पदं भविष्यति? (1+1=2)

(i) बिलम् .................... न पन्नगः। (इष् + शतृ)

(ii) कं .................... न बाधते शीतम्। (बल + वतुप्)

38. रेखाङ्कितपदेषु रिक्तस्थानपूर्तिं कुरुत (1x3=3)

(i) अनागतविधाता प्रत्युत्पन्नमतिः च .................... सह निष्क्रान्तौ (परिवारजन)

(ii) यत्र त्वं राक्षसेन्द्रेण .................... हृता बलात् (रावण)

(iii) त्रीणि शिक्षेत् .................... (गर्दभ)

## रचनाकौशलम् ( 20 )

39. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत–

पर्यावरणस्य प्रदूषणं विश्वस्य भीषणतमा समस्या अस्ति। न केवलम् अस्माकं पृथ्वी एव प्रदूषिता जाता अपितु जलम् वायुः, आकाशः, तेजोराशिः आदित्यमण्डलमपि प्रदूषणेन आच्छादितम् अस्ति। अन्तरिक्षे 'ओज़ोन' इति नाम्ना प्रसिद्धायां झिल्लिकायामपि छिद्राणि जातानि येन अस्माकं इयं पृथिवी अचिरमेव प्राणिनां कृते न वासयोग्या भविष्यति। स्वार्थसाधने संलग्नाः मानवाः गङ्गादीनां महानदीनां जलानि दूषयन्ति, वनानि छिन्दन्ति, वन्यजीवान् च मारयन्ति। हन्त! स्वार्थिनः मानवाः इदानीमपि न विचारयन्ति यत् दूषिते पर्यावरणे मानवजीवनम् दुष्करम्।

**प्रश्नाः** 1x5=5

1. कस्यां झिल्लिकायां छिद्राणि जातानि?

2. स्वार्थपरकाः जनाः कासां जलं दूषयन्ति?

3. विश्वस्य भीषणतमा समस्या का अस्ति?

4. 'भविष्यति' इति क्रियापदस्य कर्तृपदं किम्?

5. स्वार्थिनः इति विशेषणस्य विशेष्यं किम्?

40. अधोलिखितविषयम् अधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकम् अनुच्छेदं लिखत 1x5=5

'वृक्षाः परोपकारकाः'

**मञ्जूषा**

| |
|---|
| फलानि, पुष्पाणि, काष्ठम्, भूमेः दृढतां, पथिकेभ्यः रक्षन्ति, यच्छन्ति, छायां, यच्छन्ति, पक्षिणां कृते, आश्रयदातारः, वायुसंशोधकाः |

41. भवान् राकेशः छात्रावासे वसति। अस्मिन् रक्षाबंधन-उत्सवे विद्यालये सावधिकपरीक्षाकारणात् गृहं, गन्तुम् असमर्थः, डाकद्वारा, उपहारम् (पुस्तकद्वयम्) प्रेषयति, स्वभगिनीं सुमेधां प्रति पत्रं लिखतु। 1x5=5

42. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि लिखत 1x5=5



**चित्र**

**मञ्जूषा**

| |
|---|
| बालकाः पृच्छन्ति, पृष्ठे वर्तुलाकारे पात्रे, पर्वतारोहिणौ पर्वतेषु वृक्षाणाम् अभावः, वायौ ओषजनः न्यूनः, श्वासे काठिन्यम्। अतः वृक्षान् विना, मानवजीवनम्, अरक्षितम्, वृक्षाणाम् कर्तनम् अनुचितम्। |

## उत्तरमाला

1. (C) गर्ताः 1

2. (A) वानरः 1

3. (D) तृष्णा 1

4. (C) हरिणशावकः 1

5. (C) गर्दभे 1

6. (A) चतुर्थी 1

7. (B) पञ्चमी 1

8. (C) लङ् लकारः 1

9. (D) विद्वांसः मार्गात् न चलेयुः 1

10. (B) याति 1

11. शकुन्तलायै; सः पत्या समादृता भवेत्, 2
तस्याः पुत्रः अपि सम्राट् भवेत्।

12. गुप्तरूपेण कृतं पापम् 2

13. त्यागपूर्वकम् 2

14. (i) सैनिकाः (ii) सुमन्त्रं सारथिम् (iii) सर्वे सैनिकाः एकाकिना लवेन सह युद्धं कुर्वन्ति। 3

15. लवः वीरः, निर्भीकः, सीतायाः पुत्रः, वाल्मीकिना तस्मै शस्त्रास्त्रविद्या प्रदत्ता, अश्वमेधयज्ञस्य अश्वं नयति, एकाकी एव युद्धं करोति। 5

अथवा

कण्वः आश्रमस्य कुलपतिः शकुन्तला पालिता, इदानीं सः शकुन्तलां पतिगृहं प्रेषयति, पुत्रीवियोगेन व्याकुलः, सर्वैः आश्रमवासिभिः समादृतः।

16. क्रोधः अजेयः शत्रुः, लोभः न अन्तः यस्य एतादृशः व्याधिः। 2

17. इन्द्रियाणि, एकाग्रमनसा लक्ष्यं प्रति प्रहरति, ध्यानस्य एकाग्रता कार्यसाफल्याय आवश्यकी। 2

18. (i) स्वच्छतया (ii) सम्यक् चरित्रेण 2

19. रामः सीतायाः विरहे विलापम् अकरोत्। 2

20. स्नानेन शरीरस्य निर्मलता, भावानां पवित्रता, प्रतिदिनं सर्वप्रथमं स्नानम् करणीयम्। 3

21. (i) दातव्यम् (ii) पात्रे, (iii) सात्त्विकम् 3

अथवा

(i) दातव्यम् (ii) पात्राय (iii) सात्त्विकम् 3

22. वयं कौ इव स्वस्ति पन्थाम् अनुचरेम् 2

23. (i) अनागतविद्यातानामकं मत्स्यम् (ii) मत्स्यजीविनाम् 2

24. यद्यविष्यः भविष्यमेव अवश्यम्भावी मत्वा भाग्यमवलम्ब्य सरः त्यक्तुं न इच्छति। अन्ते मत्स्यजीविभिः मार्यते। 2

25. (i) पद्ये 3

(ii) गणितस्य

(iii) पशुपक्षिभ्रमरहंसादीन्

26. (i) त्याज्यं न धैर्यमिति पाठात् (ii) मकरवानरयोः, (iii) मकरी वानरस्य हृदयं खादितुम् इच्छति एम। 3

27. कस्यचिदेकस्य पाठस्य सारं पञ्चवाक्येषु लेखनीयम्? प्रतिवाक्यमेकः अङ्कः। 5

28. (i) सूर्याचन्द्रमसौ+इव 2

(ii) मित्रस्य + अहम्

29. व्यञ्जनसन्धेः त्रीणि उदाहरणानि 3

कश्चिदेकः, किन्नु, मानम्+हित्वा (मानं हित्वा) तस्मात् + एतत् – इत्यादीनि त्रीणि उदाहरणानि।

30. (i) य– तालुः 2

(ii) त – दन्त्यः

(iii) ष– मूर्धन्यः

(iv) ख– कण्ठः

31. (i) भ्रातृ द्वितीया एकवचनम्। 2

(ii) स्वसृ द्वितीया एकवचनम्

(iii) वः– युष्मद् द्वितीया, चतुर्थी, षष्ठी, बहुवचनम्

(iv) नः– अस्मद् द्वितीया, चतुर्थी, षष्ठी, बहुवचनम्

32. (i) त्रयः 3

(ii) चतस्रः

(iii) द्वाभ्याम्

33. (i) त्यज् लोट् मध्यमपुरुषे एकवचनम् 2

(ii) इ लोट् मध्यमपुरुषे एकवचनम्

34. (i) तिष्ठति- स्था लट् प्रथमपुरुषे एकवचनम् 2

(ii) अस्ति अस् लट् प्रथमपुरुषे एकवचनम्

35. (i) सत्याग्रहस्य आश्रमे (षष्ठीतत्पुरुषः) 2

(ii) द्रुमाणाम् तले (षष्ठीतत्पुरुषः)

36. (i) महात्मा 2

(ii) सुस्मितानः

37. (i) इच्छन् 2

(ii) बलवन्तम्

38. (i) परिवारजनेन 3

(ii) रावणेन

(iii) गर्दभात्

39. (i) ओजोन झिल्लिकायाम् 5

(ii) नदीनाम्

(iii) पर्यावरणप्रदूषणम्

(iv) पृथिवी

(v) मानवाः

40. मञ्जूषापदसहायतया पञ्च वाक्यानि लेख्यानि यथा 5

वृक्षाः अस्मभ्यं काष्ठानि यच्छन्ति.....

41. पत्रलेखनम् 5

| | |
|---|---|
| स्वपत्रसंकेतः | ½ |
| संबोधनम् | ½ |
| अभिवादनम् | ½ |
| कुशलसमाचारः | ½ |
| विषयवस्तु | 2 |
| समापनम्<br>संबंधः<br>पत्रलेखकस्य नाम | 1 |
| | 5 |

42. चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि लेख्यानि। 1x5=5